श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधेः कृतिषु

# ॥ श्रीपुरुषोत्तमषोडशी ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीपुरुषोत्तमषोडशी ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

वेला काचित् सेव्या
 नीलाचलमण्डिता जगति।
शैलाकारो भगवान्
 मालाकारादिपूजितो यत्र॥ १ ॥

वेलावने पूर्वमहापयोधेः
 नीलाचले कल्पितसन्निधानम्।
तालाङ्कभद्रासहितं हिताय
 कालाम्बुदाभं शरणं प्रपद्ये॥ २ ॥

नीलाम्बरेण हलिनाऽथ सुभद्रया च
 नीलाम्बुदौघनिभया निजया च मूर्त्या।
नीलादियौवतमनोरथकल्पवल्ल्या
 नीलावनीधरवरे विहरन्तमीडे॥ ३ ॥

पद्मावतीचेलवराञ्चलेन
 विलोचनान्तं परिमृष्टवन्तम्।
स्नेहाभिषिक्तं जयदेवरूपं
 नीलाचलेन्द्रं न जहाति चेतः॥ ४ ॥

जयदेवकवीन्द्रभारतीपदविन्यासवशीकृताशयः।
इह नृत्यसि किं प्रभो! न चेत्कथमेतन्नु करप्रसारणम्॥ ५ ॥

गायन्तीं जयदेवभव्यभणितिं काष्ठाहृतौ कानने
 नारीं काञ्चन कण्टकैरतितरां विद्धाङ्गजातो मुहुः।

www.prapatti.com

पद्भ्यां दूरमनुव्रजन् रसिकतां योऽदर्शयत्तादृशीं
　　तं त्वां नीलधराधरेन्द्रनिलयं नित्यं मतिश्चुम्बति॥ ६॥

पुरुषोत्तमपुण्यदेशगः परमं ब्रह्म भवान्न संशयः।
अकरोऽत्र ददाति वाञ्छितान्यपदो याति रथाय सद्म नः॥ ७॥

पदमानतभक्तमानसे भवता नूनमभून्निवेशितम्।
अत एव न दृश्यते पदं कमलद्वन्द्वविशेषकोमलम्॥ ८॥

विपदा विकला न पाण्डवाः समितौ सन्तु तदर्थमस्म्यहम्।
इति किं पुरुषोत्तमस्थले भगवन्नेवमभूः कृपाभरात्॥ ९॥

तव नाम बिभर्ति यो जनः जगतां नाथ सभक्तिरेष सः।
सृजते मधुरां हि भारती स यथा पण्डितराजनायकः॥ १०॥

अयि! पावन! मङ्गल! प्रभो! दयया त्वं मनसि स्थितो मम।
अतिपातककर्मसादरं कथमेवं कथयेदमच्युत॥ ११॥

पतितपावनस्त्वं यतस्ततः
　　प्रकटयन्निदं चेष्टसे तथा।
मुदमथो मदं याम्यहं हरे
　　तव यशो मया तादृगेधते॥ १२॥

रथैस्त्रिभिरलङ्कृतामतिविशालमध्यावनिं
　　अनौघपरिपूरितां नयनमोदसंवर्धिनीम्।
अनेकविधयानकैरपि तुरङ्गमातङ्गकैः
　　महापणगणैर्वृतां सुभगपूरिवीथीं भजे॥ १३॥

भटपङ्क्तिमध्यदेशे
　　नटनं कुर्वन्निवायमायाति।
घटयितुमानन्दं नः
　　विटकुलपतिरेष नीलशैलेन्द्रः॥ १४॥

किरीटी पुष्पौघैः जननयनबृन्दं सफलयन्
रथोपर्यारोढुं रचितगमनो वाद्यनिवहैः।
मुहुर्द्वारि द्वारि स्थितिमुपगतः कामपि शुभां
जगन्नाथस्स्पृष्टस्सकलदुरितान्ताय भगवान्॥ १५ ॥

श्रीकामपालानुज ! कामतात !
श्रीकाम ! नीलाचलकालमेघ !।
कामैकसक्तं तव पादकामं
कामं कुरुष्वैनमतीव दीनम्॥ १६ ॥

पुरुषोत्तमषोडशिस्तुतिं
पुरुषः श्रीनिधिराघवोदिताम्।
पुरुषोत्तमसूक्तिगर्भितां
पुरुषेषूत्तमतां व्रजेत्पठन्॥ १७ ॥

॥ इति श्रीपुरुषोत्तमषोडशीस्तोत्रं समाप्तम्॥

www.prapatti.com